# नीळा सूक्तम्

## *nīḻā sūktam*

नीळादेवीगं शरणमहं प्रपद्ये ।

*nīḻādevīgṁ śaraṇamahaṁ prapadye |*

गृणाहि । घृतवती सवितराधिपत्यैः पयस्वती रन्तिराशा नो अस्तु ।

*gṛṇāhi | ghṛtavatī savitarādhipatyaiḥ payasvatī rantirāśā no astu |*

ध्रुवा दिशां विष्णुपत्न्यघोराऽस्येशाना सहसो या मनोता ।

*dhruvā diśāṁ viṣṇupatnyaghorā'syeśānā sahaso yā manotā |*

बृहस्पतिर्-मातरिश्वोत वायुस्सन्धुवाना वाता अभि नो गृणन्तु ।

*bṛhaspatir-mātariśvota vāyussandhuvānā vātā abhi no gṛṇantu |*

विष्टम्भो दिवो धरुणः पृथिव्या अस्येशाना जगतो विष्णुपत्नी ॥

*viṣṭambho divo dharuṇaḥ pṛthivyā asyeśānā jagato viṣṇupatnī ||*

ॐ शान्तिः शान्तिः शान्तिः ॥

*om śāntiḥ śāntiḥ śāntiḥ ||*